# Hayagriva Upanishad

# હયગ્રીવોપનિષત્

## Document Information

Text title : Hayagriva Upanishad

File name : hayagriva_upan.itx

Category : upanishhat, svara

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 100 / 108; Atharva Veda - Vaishnava upanishad

Latest update : April, 19, 2000, July 3, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2025

*sanskritdocuments.org*

# હયગ્રીવોપનિષત્

સ્વજ્ઞોઽપિ યત્પ્રસાદેન જ્ઞાનં તત્ફલમાપ્નુયાત્ ।
સોઽયં હયાસ્યો ભગવાન્હૃદિ મે ભાતુ સર્વદા ॥

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ ।
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિઃ ।
વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥ નારદો બ્રહ્માણમુપસમેત્યોવાચાધીહિ ભગવન્
બ્રહ્મવિદ્યાં વરિષ્ઠાં યયા ચિરાત્સર્વપાપં વ્યપોહ્ય
બ્રહ્મવિદ્યાં લબ્ધ્વૈશ્વર્યવાન્ભવતિ । બ્રહ્મોવાચ
હયગ્રીવદૈવત્યાન્મન્ત્રાન્યો વેદ સ શ્રુતિસ્મૃતીતિહાસપુરાણાનિ વેદ ।
સ સર્વૈશ્વર્યવાન્ભવતિ । ત એતે મન્ત્રાઃ ।
વિશ્વોત્તીર્ણસ્વરૂપાય ચિન્મયાનન્દરૂપિણે ।
તુભ્યં નમો હયગ્રીવ વિદ્યારાજાય સ્વાહા સ્વાહા નમઃ ॥ ૧॥

ઋગ્યજુઃસામરૂપાય વેદાહરણકર્મણે ।
પ્રણવોદ્ગીથવપુષે મહાશ્વશિરસે નમઃ સ્વાહા સ્વાહા નમઃ ॥ ૨॥

ઉદ્ગીથ પ્રણવોદ્ગીથ સર્વવાગીશ્વરેશ્વર ।
સર્વવેદમયાચિન્ત્ય સર્વં બોધય બોધય સ્વાહા સ્વાહા નમઃ ॥ ૩॥

બ્રહ્માત્રિરવિસવિતૃભાર્ગવા ઋષયઃ । ગાયત્રીત્રિષ્ટુબનુષ્ટુપ્ છન્દાંસિ ।
શ્રીમાન્ હયગ્રીવઃ પરમાત્મા દેવતેતિ । હ્લૌ(હ્સૌ)મિતિ બીજમ્ ।
સોઽહમિતિ શક્તિઃ । હ્લૂ(હ્સૌ)મિતિ કીલકમ્ । ભોગમોક્ષયોર્વિનિયોગઃ ।

અકારોકારમકારૈરઙ્ગન્યાસઃ । ધ્યાનમ્ ।
શઙ્ખચક્રમહામુદ્રાપુસ્તકાઢ્યં ચતુર્ભુજમ્ ।
સમ્પૂર્ણચન્દ્રસંકાશં હયગ્રીવમુપાસ્મહે ॥

ૐ શ્રીમિતિ દ્વે અક્ષરે । હ્લૌ(હ્સૌ)મિત્યેકાક્ષરમ્ । ૐ નમો
ભગવત ઇતિ સપ્તાક્ષરાણિ । હયગ્રીવાયેતિ પઞ્ચાક્ષરાણિ ।
વિષ્ણવ ઇતિ ત્ર્યક્ષરાણિ । મહ્યં મેધાં પ્રજ્ઞામિતિ
ષડક્ષરાણિ , પ્રયચ્છ સ્વાહેતિ પઞ્ચાક્ષરાણિ ।
હયગ્રીવસ્ય તુરીયો ભવતિ ॥ ૪॥

ૐ શ્રીમિતિ દ્વે અક્ષરે । હ્લૌ(હ્સૌ)મિત્યેકાક્ષરમ્ । ઐમૈમૈમિતિ
ત્રીણ્યક્ષરાણિ । ક્લીં ક્લીમિતિ દ્વે અક્ષરે । સૌઃ સૌરિતિ દ્વે અક્ષરે ।
હ્રીમિત્યેકાક્ષરમ્ । ૐ નમો ભગવત ઇતિ સપ્તાક્ષરાણિ ।
મહ્યં મેધાં પ્રજ્ઞામિતિ ષડક્ષરાણિ । પ્રયચ્છ
સ્વાહેતિ પઞ્ચાક્ષરાણિ । પઞ્ચમો મનુર્ભવતિ ॥ ૫॥

ઇતિ હયગ્રીવોપનિષત્સુ પ્રથમોપનિષત્ ॥ ૧ ॥

હયગ્રીવૈકાક્ષરેણ બ્રહ્મવિદ્યાં પ્રવક્ષ્યામિ । બ્રહ્મા
મહેશ્વરાય મહેશ્વરઃ સંકર્ષણાય સંકર્ષણો નારદાય
નારદો વ્યાસાય વ્યાસો લોકેભ્યઃ પ્રાયચ્છદિતિ
હકારોંસકારોમકારોં ત્રયમેકસ્વરૂપં ભવતિ । હ્લૌં(હ્સૌં)
બીજાક્ષરં ભવતિ । બીજાક્ષરેણ હ્લૌં(હ્સૌં) રૂપેણ તજ્જાપકાનાં
સમ્પત્સારસ્વતૌ ભવતઃ । તત્સ્વરૂપજ્ઞાનાં વૈદેહી
મુક્તિશ્ચ ભવતિ । દિક્પાલાનાં રાજ્ઞાં નાગાનાં
કિન્નરાણામધિપતિર્ભવતિ । હયગ્રીવૈકાક્ષરજપશીલાજ્ઞયા
સૂર્યાદયઃ સ્વતઃ સ્વસ્વકર્મણિ પ્રવર્તન્તે । સર્વેષાં
બીજાનાં હયગ્રીવૈકાક્ષરબીજમનુત્તમં મન્ત્રરાજાત્મકં
ભવતિ । હ્લૌં(હ્સૌં) હયગ્રીવસ્વરૂપો ભવતિ । અમૃતં કુરુ કુરુ સ્વાહા ।
તજ્જાપકાનાં વાક્સિદ્ધિઃ શ્રીસિદ્ધિરષ્ટાઙ્ગયોગસિદ્ધિશ્ચ
ભવતિ । હ્લૌં(હ્સૌં) સકલસામ્રાજ્યેન સિદ્ધિં કુરુ કુરુ સ્વાહા ।
તાનેતાન્મન્ત્રાન્યો વેદ અપવિત્રઃ પવિત્રો ભવતિ । અબ્રહ્મચારી
સુબ્રહ્મચારી ભવતિ । અગમ્યાગમનાત્પૂતો ભવતિ । પતિતસમ્ભાષણાત્પૂતો
ભવતિ । બ્રહ્મહત્યાદિપાતકૈર્મુક્તો ભવતિ । ગૃહં ઋહપતિરિવ

દેહી દેહાન્તે પરમાત્માનં પ્રવિશતિ । પ્રજ્ઞાનમાનન્દં બ્રહ્મ
તત્ત્વમસિ અયમાત્મા બ્રહ્મ અહં બ્રહ્માસ્મીતિ મહાવાક્યૈઃ
પ્રતિપાદિતમર્થં ત એતે મન્ત્રાઃ પ્રતિપાદયન્તિ ।
સ્વરવ્યઞ્જનભેદેન દ્વિધા એતે । અથાનુમન્ત્રાઞ્જપતિ ।

યદ્વાગ્વદન્ત્યવિચેતનાનિ રાષ્ટ્રી દેવાનાં નિષસાદ મન્દ્રા ।
ચતસ્ર ઊર્જં દુદુહે પયાંસિ ક્વ સ્વિદસ્યાઃ પરમં જગામ ॥ ૧॥

ગૌરીર્મિમાય સલિલાનિ તક્ષત્યેકપદી દ્વિપદી સા ચતુષ્પદી ।
અષ્ટાપદી નવપદી બભૂવુષી સહસ્રાક્ષરા પરમે વ્યોમન્ ॥ ૨॥

ઓષ્ઠાપિધાના નકુલી દન્તૈઃ પરિવૃતા પવિઃ ।
સર્વસ્યૈ વાચ ઈશાના ચારુ મામિહ વાદયેતિ ચ વાગ્રસઃ ॥ ૩॥

સસર્પરીરમતિં બાધમાન બૃહન્મિમાય જમદગ્નિદત્ત ।
આસૂર્યસ્ય દુરિતા તનાન શ્રવો દેવેષ્વમૃતમજુર્યમ્ ॥ ૪॥

ય ઇમાં બ્રહ્મવિદ્યામેકાદશ્યાં પઠેદ્ધયગ્રીવપ્રભાવેન
મહાપુરુષો ભવતિ । સ જીવન્મુક્તો ભવતિ । ૐ નમો બ્રહ્મણે
ધારણં મે અસ્ત્વનિરાકરણં ધારયિતા ભૂયાસં કર્ણયોઃ
શ્રુતં માચ્યોઢ્વં મમામુષ્ય ઓમિત્યુપનિષત્ ॥

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥

ૐ સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ હરિઃ ૐ તત્સત્ ॥

ઇતિ હયગ્રીવોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Hayagriva Upanishad*

pdf was typeset on March 3, 2025

Please send corrections to *sanskrit@cheerful.com*